स्थादनीयम्। तत्र यदग्निप्रणयनन्तत् सोमयागार्थमेव पशोरप्युपकरोति प्रसङ्गादिति पश्वर्थमित्युक्तम्। अतोऽग्निप्रणयनस्य पशोः श्वःसुत्यानन्तर्यमेव कर्त्तुं युक्तम्" वृ०। "अतिप्रणीतचर्यायां च वैगुण्यं दर्शपूर्णमासयोः तथाग्निहोत्रस्य" सू० "एवं तावदौपवसथिकस्य अग्निप्रणयनादेरग्निहोत्रादिमासेभ्य ऊर्द्ध्वमेव कर्त्तव्यतां प्रतिपाद्येदानीमग्निप्रणयनस्याग्निहोत्रादिमासेभ्यः पुरस्तात् क्रियायां दर्शपूर्णमासयोरग्निहोत्रस्य च वैगुण्यं भवतीति प्रतिपादयति। कुतः? इति चेत्, प्रकृतौ नैयमिकेऽतिप्रणीते उत्तरवेद्यान्तयोर्यागादिदर्शनात्। अतो वैगुण्यकरत्वादग्निप्रणयनन्तावत् पुरस्तान्न कर्त्तव्यमित्यस्य विशेषोऽन्येभ्य इत्युक्तम्" वृ०। "सदो हविर्धानान्याग्नीध्रीयाग्नीषोमप्रणयनवसतीवरीग्रहणानि पश्वर्थानि भवन्ति सुत्यार्थान्येके" सू०। "एवं तावदौपवसथिकेषु यः, सः श्वःसुत्यानिमित्तत्वादग्निहोत्रादिमासेभ्य ऊर्द्ध्वं कर्त्तव्य इत्युक्तम्। अग्निप्रणयनस्य सुत्यार्थत्वात् पशोरप्युपकारकत्वाच्च पुरस्तात् क्रियायाञ्चाग्निहोत्रादीनां वैगुण्यकरत्वाच्चेदित्युक्तम्। इदानीं येषां श्वःसुत्यावचनं नास्ति सुत्यादिभिस्तु सुत्याङ्गभावोऽस्त्येव अङ्गभावश्च सन्निपत्योपकारद्वारेण, तेषां सुत्याकर्मण्योद्देशादिसाधन इत्यकल्परूपाणां सदआदीनामग्निहोत्रादिमासेभ्यः पुरस्तात् करणे किञ्चिददृष्टं दृष्टं वा प्रयोजनं नास्ति। तेषां पुरस्तात् करणे प्रमाणं च नास्ति, कुतः?" वृ०। "तत्कालास्त्वेव तद्गुणाः" सू०। "यस्य प्रधानस्य यः कालः स एव कालस्तद्गुणानां प्रधानकाल एव अङ्गानां मुख्यकाल इत्यर्थः। तदेतन्न्यायविदां प्रसिद्धम्। अत एव प्रसिद्धवदुपदिष्टवानाचार्यः 'तत्कालास्त्वेव तद्गुणाः' इति। एतदुक्तं भवति यस्मात् प्रधानकाला एव प्रधानगुणाः तस्मात् सदआदीनामग्निहोत्रादिमासेभ्यः पुरस्तादक्रियैव। तत्कालास्त्वेव तद्गुणा इति चशब्दोऽत्र पठितः प्रधानकाले च गुणाः कर्त्तव्या इत्यर्थः। सदआदीनाम्पश्वर्थतावचनम् अभ्युपगम्य सदआदीनि पश्वर्थानि वा भवन्तु, सुत्यार्थानि वा, सर्वथा तावदग्निहोत्रादिभ्यः पुरस्तात् क्रिया न स्यादित्ययमभिप्रायः। अङ्गानां प्रधानकालत्वमुक्तं 'तत्कालास्त्वेव तद्गुणाः' इति। यानि पुनरङ्गानि प्रधानकालाद्विप्रकृष्टानि, यथा 'अग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति" इति तेषां पश्वर्थता नास्ति सौमिकैः पदार्थैर्व्यवधानादिति। अतोऽनुयाजसदृशानि कर्मान्तराणि सोमाङ्गत्वेनैव विधीयन्त इति प्राप्ते उच्यते" वृ०। "सिद्धस्वभावानां न व्यवधानादन्यत्वं यथा पृष्ठ्याभिप्लवयोः" सू०। "प्रकृतौ सिद्धस्वभावानां पदार्थानां विकृतौ पदार्थान्तरव्यवधानमात्रेण तेषामन्यत्वं न स्यात्। अनन्यत्वे च प्राकृतोपकारत्वे नाङ्गत्वमपि स्यात्। प्राकृतानां विकृतावुपकारद्वारेण हि पदार्थानां प्राधानानामनुपकारकत्वमित्ययुक्तं यदि परं व्यवधानादन्यत्वं भवति। अतो विप्रकृष्टकाला अपि पदार्थास्तद्गुणा एव भवन्ति, तद्धानपगमादिति कर्मान्तरत्वपक्षे वाक्यभेदादिति प्रसजेत। यथा पृष्ठ्याभिप्लवयोरिति व्यवधानादन्यत्वाभावे दृष्टान्तः। यथा पृष्ठ्यस्य वाभिप्लवस्य वान्यस्य वा सङ्घाते रूपविशेषस्य मध्ये यजमानमरणस्य निमित्तेन नैमित्तिकमहरन्तरमुपजायते तत्र तेन व्यवधानमस्ति, तथा पृष्ठ्यादिसङ्घातविशेषबुद्धिर्नापैति तद्वदत्रापीति। यस्माद्व्यवधानात् पदार्थान्यत्वं नास्ति, अत एकौपवसथिकस्याग्निहोत्रादिमासेभ्यः पुरस्तात् क्रियाशङ्कानिराकरणार्थमिदं प्रकरणमारब्धम्। कानिचिदङ्गानि तत्कालानि कानिचिद्विप्रकृष्टकालानीत्येवमुभयथा व्यवहारोऽस्ति। सर्वथा तावदग्निहोत्रादिमासेभ्यः पुरस्तादौपवसथिकं न कर्त्तव्यमिति प्रकरणार्थः" वृ०। "सगुणानां ह्येव कर्मणामुद्धार उपजनो वा" सू० "अयमप्यग्निहोत्रादिमासेभ्यः उपरिष्टादौपवसथिकक्रियायां हेतुः। यस्मात् प्रधानकर्मणामुद्धारे उपजने-उत्कर्षे च सगुणानामेव सर्वत्रोद्धारादिर्दृष्टः यथा स्नानभोजनविहाराणामहरहः कार्याणाङ्कस्यचिदुद्धारे सगुणस्यैवोद्धारो दृष्टः, उत्कर्षे च सगुण एवोत्कृष्यते, एतेषां नित्यकार्याणामन्तराले अनन्यनैमित्तिकमुपजायमानं सगुणमेवोपजायते, एवमत्रापि वैशेषिकैरग्निहोत्रादिभिरुत्कृष्यमाणं सौत्यं कर्म आत्मनो गुणभूतेन औपवसथिकेन सहोत्कृष्यते। हिशब्दः प्रसिद्धौ। यस्मात् सर्वत्र उद्धारोपजनोत्कर्षाः सगुणानामेव दृष्टाः तस्मादत्रापि सगुणस्य सौत्यस्य उत्कर्षो युक्त इति सूत्रार्थः" वृ०। "सुब्रह्मण्या त्वत्यन्तम्" सू०। "प्रासङ्गिकोऽयं सुब्रह्मण्याविचारः प्रकृतावुपसत्सुत्याकालत्वात्। सुब्रह्मण्यायाः अग्निहोत्रादिमासानाञ्च सुत्योपसदभावात् सुब्रह्मण्याया अभावशङ्का स्यात्, तत इदमुच्यते। सुब्रह्मण्याया अयं विशेषः। अत्यन्तं-नित्यं कर्त्तव्या, अग्निहोत्रादिमासेष्वपि अप्राकृतोऽयङ्कालः इति नोत्स्रष्टव्या। अनवधृतेहकालसंशयत्वात्। प्रकृतावुपसत्सुत्याकाला सती सुब्रह्मण्या